# INDIAN SCHOOL AL WADI AL KABIR

| Class: VIII- 3rd Lang. | Department: Sanskrit | Date of submission: N.A |
|---|---|---|
| Worksheet no. 3 | Topic : अपठित-अनुच्छेदा: | Note: Pl. file in portfolio |

*** निम्नलिखित अनुच्छेदान् पठित्वा प्रश्नान् उत्तरयत ।**

**1.** अद्य सर्वे जनाः अधिकारस्य इच्छां कुर्वन्ति । तेषां कर्तव्यं किम् अस्ति इति कोऽपि न जानाति। एषः मम अधिकारः इति तु सर्वे कथयन्ति । यदि अद्य वयम् अधिकारं परित्यज्य एतद् मम कर्त्तव्यम् इति विचार्य कार्यं कुर्याम तदा तु सर्वाः एव समस्याः स्वतः एव दूरी भविष्यन्ति।

**I. एकपदेन उत्तरत-**

(i) सर्वे जनाः कस्य इच्छां कुर्वन्ति ? ...............................

(ii) के अधिकारस्य इच्छां कुर्वन्ति ? ...............................

**II. पूर्णवाक्येन उत्तरत-**

सर्वे किं कथयन्ति ? ......................................................................

**III. निर्देशानुसारम् उत्तरत-**

(i) जनाः इत्यत्र किं वचनम् ? ...............................

(ii) कुर्वन्ति इत्यत्र कः पुरुषः? ...............................

**2.** छात्राः यदा भ्रमणार्थं गच्छन्ति तदा ते अतिप्रसन्नाः भवन्ति। यतः ते स्वछन्दाः भवन्ति। मानवाः यदा स्वछन्दाः भवन्ति तदा ते सुखम् अनुभवन्ति। विद्यालयस्य अन्तः ते नियमेन बद्धाः भवन्ति। नियमानाम् अनुपालनं तेषां कृते अनिवार्यम् भवति ।

**I. एकपदेन उत्तरत-**

(i) के भ्रमणार्थ गच्छन्ति ? ...............................

(ii) विद्यालयस्य अन्तः छात्राः केन बद्धाः भवन्ति ? ...............................

**II. पूर्णवाक्येन उत्तरत-**

छात्राः कदा प्रसन्नाः भवन्ति ? ......................................................................

**III. निर्देशानुसारम् उत्तरत-**

i) मानवाः पदे क: अर्थ: ? ...............................

**3.** अद्य छात्राणां प्रवृत्तिः तु परिवर्तिता एव। ते पठनम् अतिरिच्य ईदृशेषु कार्येषु संलग्नाः जाताः येन तेषां ह्रासः एव भवति उत्थानं तु न। छात्रकाले यदि ते ईदृशेषु कार्येषु रताः भविष्यन्ति तदा तेषां भावीजीवनम् अन्धकारमयम् एव भविष्यति। अतः छात्राणां प्रवृत्तिः ईदृशी न भवेत् एतदर्थं प्रतिदिनं नैतिकमूल्यानां शिक्षणम् अनिवार्यम्।

**I. एकपदेन उत्तरत-**

(i) केषां प्रवृत्तिः परिवर्तिता ? ..............................

(ii) छात्राः किम् अतिरिच्य अन्येषु कार्येषु संलग्नाः सन्ति? ..............................

**II. पूर्णवाक्येन उत्तरत-**

प्रतिदिनं केषां शिक्षणम् अनिवार्यम्? ......................................................................

**III. निर्देशानुसारम् उत्तरत-**

रिक्तस्थानेषु क्रियापूर्तिं कुरुत |

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| भविष्यति | ............... | ............... |

**4.** अद्य विद्यालये अवकाश: अस्ति | राघव: पाठं न पठति | स: दूरदर्शने क्रिकेट प्रतियोगितां पश्यति | राघवस्य मित्रं रोहण: अपि विद्यालय-कार्यम् न करोति | रोहण: पुत्तलिका खेलं द्रष्टुम् गच्छति | स: मित्रैः सह खेलम् पश्यति | पुत्तलिका खेल: अतीव रोचक: अस्ति | सूत्रधार: खेलं करोति | पुत्तलिका: नृत्यन्ति | खेलं दृष्ट्वा सर्वे प्रमुदिता: सन्ति |

**I. एकपदेन उत्तरत-**

(i) अवकाश: कुत्र अस्ति ? ..............................

(ii) क: पाठं न पठति ? ..............................

(iii) रोहण: कस्य मित्रम् ? ..............................

(iv) रोहण: किं न करोति ? ..............................

**II. पूर्णवाक्येन उत्तरत-**

(i) रोहण: किमर्थं गच्छति ? ......................................................................

(ii) सूत्रधार: किं करोति, पुत्तलिका: च किं कुर्वन्ति ? ......................................................................